T.349 (2)

॥ सर्वज्ञानोत्तरम् ॥
(योगपादम्)

अतः परं प्रवक्ष्यामि योगः -
डाकिनस्तु शान्तस्य यन्तु चित्तविरागिणः।
विहारस्य युक्त चेष्टस्य कर्मसु -
अन्तस्वभावबोधस्य तत्वत शृणु षण्मुख।
यो ध्याता यच्च तद्ध्यानं तद्वै ध्यान प्रयोजनम्।
सर्वाण्येतानि यो वेत्ति स योगं योक्तुमर्हति।
आत्मा ध्याता मनो ध्यानं ध्येय स्सूक्ष्मो महेश्वरः।
यत्परा परमैश्वर्य मेतद्ध्यान प्रयोजनम्।
मानामानौ समौ कृत्वा सुद दुःखे समे तथा।
हर्षं भयं विषादञ्च सन्त्यज्य योगमभ्यसेत्।
(५२) शून्यागारे मठे रम्ये देवतायने शुभे।
नदी तीरे विविक्ते व गृहे चीरवनेपि वा।
प्रच्छन्ने च विविक्ते च निश्शब्दे जनवर्जिते।
योग दोष विनिर्मुक्ते निर्विकल्पे निरातपे।
स्नात्वा शुचिरुपस्पृश्य प्रणम्य शिरसा शिवम्।
योगाचार्यं नमस्कृत्य योगं युञ्जीतमानवः।
पद्मकं स्वास्तिकं वापि सुस्थाप्यञ्जलिन्तथा।

पीठार्धमर्धचन्द्रं वा सर्वतो भद्रमेव वा।
आसनं रुचिरं बध्वा ऊर्ध्वकायस्समं शिरः।
सर्वसंगान् परित्यज्य आत्मसंस्थं मनो गुरु।
(१२) न दन्तै स्संस्पृ दन्तान् स्पृष्ठिभ्यौ न जिह्वया।
किञ्चित् कुञ्चित नेत्र स्तु शिवं सम्यक्ततो चरेत्।
१०० सौङ्कासयति तत्वानि तन्मात्राद्यानि देहिनाम्।
पुनर्विनाशकश्चैव अस्त्रयुक्तश्षडानन।
न पृथग्भदयन्तस्य न शिरो न शिखा गुरु।
वर्मास्त्र नेत्र सहितं तस्मादेव प्रवर्तते।
प्राणापानौ समौ कृत्वा सुषुम्नान्तरचारिणौ।
तयोर्वृत्तिं निरुध्यात्मा शिवं ध्यायेद्विचक्षणः।
अविनाभाव संयुक्तो ज्योतिरूपं सुनिर्मलम्।
सुसूक्ष्मं व्यापकं नित्यं निर्विकल्पं सदा बुधः।
(१५) उत्तमा मध्यमा मन्दा सगर्भा स्त्रिविधा स्मृताः।
प्राणायामांश्च तान् कुर्यात् पूरकुंभकरेचकान्।
१०१ प्राणायामैर्दहेत् दोषान् धारणाभिस्तु किल्बिषम्।
प्रत्याहारेण संसर्गान् ध्यानेनानश्वरान् गुणान्।
उदरं पूरयित्वा तु वायुना यावदीप्सितम्।
प्राणायामो भवेदेव धृकी देह धृकः।

विधाय सर्वद्वाराणि निश्वासोच्छ्वास वर्जितः।
संपूर्णं कुंभवत्तिष्ठेत् प्राणायामस्स कुंभकः।
ततोऽर्धं रेचयेद्वायुं मृदुनिश्वास संयुतम्।
रेचकस्त्वेष विख्यातः प्राणसंक्षयकारकः।
(८०) प्रसार्य चाग्रहस्थन्तु जानुं कृत्वा प्रदक्षिणम्।
७।८ छोटिकान्तु ततो दद्यात् मात्रैषाऽभिधीयते।
मात्रा द्वादशविज्ञेयाः प्रमाणं तालसंज्ञिकम्।
तालद्वादशकं ज्ञेयं प्राणायामस्तु कन्यसम्।
मध्यमश्च चतुर्विंशज्ज्येष्ठं तद्द्विगुणो भवेत्।
ऽकैकां वर्धयेन्मात्रां प्रत्यहं योगवित्तमः।
न त्वरेण विभुंत्येन क्रमेणैव विवर्धयेत्।
प्राणायामोत्तमो यत्तद्द्विगुणा धारणा मता।
धारणा द्विगुणा योगो योगोपि द्विगुणीकृतः।
योगसिद्धिरिति ज्ञेया शिवेन परमात्मना।
(८५) तदानुपश्यते सूक्ष्मं गन्धतन्मात्रमात्मनि।
सं तेजश्च स्पर्शञ्च शब्दतन्मात्रमेव च।
७।८ पश्यते क्रमयोगेन वर्णभावैः पृथग्विधैः।
अहंकारं मनोबुद्धिं गुणमव्यक्त पौरुषम्।
अभिव्यक्तानि जानीयात् स्वधर्मगुणलक्षणात्।

विद्या कलान्ततः कालं माया विद्यान्ततः परम्।
सन्दृश्य क्रमशस्सर्वान् पुनस्त्रेण भेदयेत्।
विद्येश्वरं ततस्तत्वं तथा सादाशिवं परम्।
भित्वा क्षुरिकास्त्रेण ततस्सूक्ष्मं विशं विशेत्।
अमृतात्मा शिवस्साक्षा-तारुमान्विष्टस्तु योगवित्।
(३०) सर्वज्ञस्सर्वगस्सूक्ष्मस्सर्वेशस्सर्व बन्धवेत्।
सर्वज्ञत्व हि शास्त्रेषु ज्ञेयं वस्तु-चतुष्टयम्।
पशुः पाशः पतिश्चैव शिवश्चेति यथाक्रमम्।
(३१) ज्ञात्वा तु तत्वसद्भाव तन्त्रसानन्तु दुर्लभम्।
सर्वथा वर्तमानोपि गृह्णाति न पुनस्तनुम्।
(३२) " योगपादं समाप्तम् "

" ज्ञान पादम् "

" पत्यादि पदार्थत्रय प्रकरणम् "

पशुपाश विधानं हि श्रोतुमिच्छामि तत्वतः।
संयोगश्च तथा तेषां कथयस्व महेश्वर।
आद्याः पाशास्तत स्तेषां जीव आद्यस्तु किन्तु वै।
के पाशाः के मलः प्रोक्तः कस्माद्बद्धः पुमानिति।
पतिश्च किं विधो ज्ञेयस्साधिकारपदे स्थितः।

शिवश्च कीदृशः प्रोक्तो योधिकार विवर्जितः।

ईश्वरः- परमात्मास्वतन्त्रश्च चिन्मात्रोमलदूषितः।

७२८ सम्मूढो नित्यसंसारी किञ्चिज्ञोबीश्वरो क्रियः।
ताम्रस्यैव तु हेमत्व मन्तर्लीनं यथा स्थितम्।
अन्तर्लीनं तथा ज्ञेयं शिवत्वं पुद्गलस्य तु।
ससिद्धं यथा ताम्रं हेमत्वं प्रतिपद्यते।
तथात्मा ज्ञान संबन्ध शिवत्वं प्रति पद्यते।
यथा ज्ञात्वा विभागेन घृतं पयसि संस्थितम्।
तथात्मा पाशसंश्लिष्ट स्वविभागेन संस्थितः।
विषापहारं कुरुते ध्यानबीज बलै र्यथा।
कुरुते पाशविश्लेषं तथा चार्य शिवादृवैः।
मन्त्रौषध बलै र्यद्वत् सन्निरोधो विषस्य तु।
तथा हि सर्वपाशानां सन्निरोधस्तु दीक्षया।
दह्यते ध्मायमानानां धातूनान्तु यथामलम्।
७३२ तथा चार्यो दहेत्पुंसां वायुभूतो मलावुभौ।
(७) गुणभूता स्मृताः पाशाः धर्माधर्मौ मलौ स्मृतौ।
सहजौ सर्वजन्तूना न्ताम्र कालिकवत् स्थितौ।
त्रिविधास्ते स्मृताः पाशा स्सहजागन्तुका स्तथा।
सांसर्गिका स्तथा ज्ञेय स्तृणतेषु विनिर्मयम्।

तन्मात्राद्यास्तु ये तत्वास्तु सूक्ष्मास्सर्वगा शुद्ध।
ते तु पाशाः पशः प्रोक्तास्सहजास्सर्वजन्तुषु।
इन्द्रियाणि च भूतानि यद्बीजं ते सुसंभवम्।
आगन्तुका स्मृता ह्येते तस्मात्सांसर्गिकाः पुनः।
संसर्गाच्च भवेत्कर्म शुभं वा यदि वा शुभम्।
तै तु सांसर्गिकाः पाशास्सुख दुःख फलप्रदाः।
कर्मणान्तु शरीराणि भावात्कर्मोदयो भवेत्।
पूर्वोपार्जित कर्माणि भावस्संयोग कारकः।
ईश्वरेच्यन्तकस्तेषां भवेत्कर्मानुरूपतः।
कर्मोदयात् भवेत् सृष्टिरपास्तैः प्रलयं विदुः।
भूतात्मा त्यन्तरात्मा च तत्वात्मा जीवसंज्ञकः।
मन्त्रात्मा परमात्मा च तस्मात्परतरन्नहि।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च।
संयोगस्सर्वभूतानां संप्रकीर्तितः।
पुरुषाधिष्ठितं बीजं स्तन्मात्रैर्बीज संयुतैः।
संभवन्ति महाभूतामला धातु समन्विताः।
सर्वेन्द्रिय समायुक्तं शरीरमिति चोच्यते।
विनाशोत्पत्तिरेवास्य तच्चाहारमयं विदुः।
आहारस्य परीणामादसोत्पत्तिर्भविष्यति।

विषया संगदोषेण गुणसंगात्तथेश्वि ध्वज।
बद्धमाप्नोति पुरुषो त्यक्ता सर्वगोपि सन्।
पिता पुत्रापराधेन यथैकस्थो निबध्यते।
अकर्तापीह पुरुषस्तथा बन्धमवाप्नुयात्।
यथैव साधुसंयोगादुदासीनोपि मानवः।
तथा बन्धमवाप्नोति तथा ज्ञेयस्तु पुद्गलः।
अनादिनिधनाः पाशाः जीवो नाद्यस्तु कीर्तितः।
तच्छेदकस्तथानादिः पशुपाशपतिस्तु सः।
पतिस्सदाशिवो ज्ञेयो मन्त्रात्मा मन्त्रविग्रहः।
सर्वमन्त्राधिपश्चासौ सृष्टिसंहारकारकः।
षडवर्णादिभिर्युक्तैः पूज्यते सर्वदात्मह।
अशेष भावनाधारो योगपीठासनस्थितः।
पतिरेवं समाख्यातस्सर्वकाम फलप्रदः।
स्थूलसूक्ष्मोपि मित्रश्च ध्रुवं रूपन्तु संस्मृतः।
शिवस्तु परन्तस्मान्मन्त्रातीतो निरञ्जनः।
निरामयो निराधारो वर्णरूप विवर्जितः।
सर्वज्ञस्सर्वग शान्तस्सर्वात्मा सर्वतो मुखः।
(30) अतीन्द्रियो निरालम्ब स्सूक्ष्मश्शाश्वतो ध्रुवः।
55a स एव भगवान्व्यापी अप्रमेयोत्यनूपमः।

बाह्येन्तर्विभागेन तिले तैलमिव स्थितम्।
अथान्यं संप्रवक्ष्यामि उपायं तत्वतो गुह।
अग्राह्यस्यापि सूक्ष्मस्य सर्वगस्य तु निष्कलम्।
ज्ञान विज्ञायते सम्यक् यं ज्ञात्वा तु शिवो भवेत्।
न कस्यचिन्मयाख्यातं तद्विज्ञानं शृणुष्वमे।
गुरोः परंपरायातमदृष्टं सर्ववादिभिः।
भवबन्ध विमोक्षार्थं परमं सर्वतो मुखम्।
योसौ सर्वगतो देवस्सर्वात्मा सर्वतो मुखः।
५५८ सर्वतत्वमयोचिन्त्यस्सर्वस्योपरि संस्थितः।
सर्वतत्व व्यतीतश्च वाङ्मनो नाम वर्जितः।
सोहमेव मुपासीत निर्विकल्पेन चेतसा।
यदेव निष्कलं ज्ञान शाश्वतं ध्रुवमव्ययम्।
निर्विकल्पमनिर्देश्यं हेतु दृष्टान्तवर्जितम्।
अलिंगमक्षरं शान्तं विषयातीतगोचरम्।
अविभाव्यमसन्दिग्धन्तदहन्नात्र संशयः।
अहमेव परोदेवस्सर्वमन्त्रमयश्शिवः।
सर्वमन्त्र व्यतीतश्च सृष्टिसंहारवर्जितः।
मयाव्याप्तमिदं सर्वं दृश्यादृश्यञ्चराचरम्।
अहमेवजगन्नाथो मत्तस्सर्वं प्रकाशते।

५८१ अनेनाकारसंभिन्नं विश्वं भुवनसञ्चयम्।
शिवायवनिपर्यन्तं तत्सर्वं मयि संस्थितम्।
यच्चकिञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेपि वा।
बहिरन्तर्विभागेन तत्सर्वं व्यापितं मया।
अहमात्मा शिवो त्यन्यः परमाहमिति यस्मृतः।
शिवमुपासयेन्मोहान्न शिवत्व मवाप्नुयात्।
शिवोन्यस्त्वहमेवान्यः पृथग्भावं विवर्जयेत्।
याश्शिवस्सोहमेवेति अद्वैतं भावयेस्सदा।
अद्वैतभावसंयुक्त सर्वस्यात्मानि संस्थितः।
सर्वगं सर्वदेहस्थं पश्यते नात्र संशयः।
शिवमेकात्मभावेन संस्थितस्य तु योगिनः।
५८८ सर्वज्ञत्वं प्रवर्तेत विकल्पेन हितस्य च।
योसौ सर्वेषु शास्त्रेषु पठ्यते त्वज ईश्वरः।
अकायो निर्गुणो त्यात्मा सोहमस्मि न संशयः।
अविज्ञातः पशुस्सोहि सृष्टिधर्म समाश्रितः।
विज्ञातव्या त्यतद्रुद्रस्सशिवो नात्र संशयः।
तस्मादात्मा सदावेद्यस्सुविचार्य विचक्षणैः।
परापरविभागेन स्थूलसूक्ष्मविभागशः।
परः परमनिर्वाणः अपरसृष्टि भेदतः।

स्थूलो मन्त्रमयः प्रोक्तो सूक्ष्मो ध्यानैक संस्थितः।
अथवा बहुशोक्तेन किमुक्तेन षडाजन।
वाग्विकल्प विशेषेण मानस सम्भोद्भवाणिः।
57a सर्वे धर्मात्मनस्सन्ति यमेव परिकल्पयेत्।
तत्तद्भवत्यसन्देहात्सदा तद्भाव भावतः।
इत्येवमात्मविज्ञानं कथितन्तु समासतः।
ज्ञात्वैवात्ममयं सर्वमात्मानं पर्युपासते।
न तत्र देवा वेदा वा यज्ञा वा बहुदक्षिणा।
आत्मविज्ञानमाश्रित्य विमलं सर्वतो मुखम्।
संसारार्णवमग्नानां भूतानां शरणार्थिनाम्।
नान्यच्छरणदः कश्चिदात्मज्ञाना हते क्वचित्।
आत्मानं परमो भूत्वा यो विजानाति तत्वतः।
स मुच्यते क्षयद्वेन सर्वावस्थां गतोपि सन्।
आत्मलाभात् परो लाभः क्वचिदन्यो न विद्यते।
57b तदात्मानमुपासीतयोयमात्मा परस्तु सः।
न प्राणो नैव चापानो विशिष्ट करणस्तथा।
सर्वज्ञन्तु तमात्मानं परिपूर्णं सदा स्मरेत्।
न चैवाभ्यन्तरे बाह्ये नाति दूरे समीपतः।
सन्निष्कले परे स्थाने तत्र चित्तानि वेशयेत्।

तिर्यगूर्ध्वमधश्चैव बहिरन्तश्च नित्यशः।
सर्वशून्यन्तमाभासमात्मानं भावयेत्सदा।
नैव शून्यं न चाशून्यमशून्यं शून्यमेव च।
पक्षपातविनिर्मुक्तमात्मानं पर्युपासयेत्।
३० निरामयं निराधारं वर्णरूप विवर्जितम्।
निरञ्जनं गुणातीतमात्मानं पर्युपासयेत्।
३४ निराश्रयं निरालम्बमप्रमेय मनौपमम्।
स्वभाव विमलं नित्यमात्मानं पर्युपासयेत्।
सन्यस्य सर्वकर्माणि निस्पृहस्संगवर्जितः।
भावयेदात्मनात्मानमात्मन्येवात्मनि स्थितम्।
स देशा जाति संबन्ध वर्णाश्रम समन्वितान्।
भावानेतान्परित्यज्य स्वरूपं भावयेद्बुधः।
मन्त्रोयं देवतात्वेषा इदन्ध्यानमिदं तपः।
सर्वभावान्परित्यज्य आत्मभावन्तु भावयेत्।
अभावो भावमाश्रित्य भावं कुर्यान्निराश्रयम्।
३४ आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्।
नैव चिन्त्यंन चाचिन्त्यमचिन्तं चिन्तमेव च।
पक्षपातविनिर्मुक्तमात्मानं पर्युपासयेत्।
अचिन्त्यं चिन्तयेन्नित्यं कृत्वा चित्तं निराश्रयम्।

निरस्तत्वे निष्कलीभूते विन्दत्वात्मनि यत्सुखम्।
निर्विकल्पमचिन्त्यञ्च हेतु दृष्टान्तवर्जितम्।
तत्सुखं परमं प्रोक्तमत्यन्तिकमनोपमम्।
निरस्तविषयासंग मनो वृत्तिं विवर्जयेत्।
यदा यात्युन्मनीभावन्तदा तत्परमं सुखम्।
सर्व दिग्देशकालेषु योगाभ्यासो विधीयते।
सर्ववर्णाश्रमाणाञ्च ज्ञानभेदो न विद्यते।
श्वामनेकवर्णानां क्षीरस्याप्येकवर्णता।
क्षीरवत्पश्यते ज्ञानं लिंगिनश्च गवां समाः।
यस्मात्सर्वगतं ब्रह्मव्यापकं सर्वतो मुखम्।
तस्माद्ब्रह्मणि संस्थाप्य दिग्देशान्नविचारयेत्।
नैव तस्य कृतेनार्थो न कार्यो न विधिस्मृतः।
न लिंगं नाश्रमा चारः परमात्मनि संस्थितः।
गच्छन् तिष्ठन् स्वपन् जाग्रन् भुञ्जानोपि पिबन्नपि
सर्वदा सर्वकालेषु वातशीतातपेषु च।
भयदारिद्र्यरोगेषु मान्यविज्वरकादिषु।
आत्मन्येवस्थितश्शान्त आत्मतृप्तस्तु निष्कलः।
नाहंगतोहं गतो वापि नागमिष्ये न गच्छता।
न भूतो न भविष्यामि न कृत्यास्थिर धर्मिणी।

७१८

प्राकृतानि च कर्माणि प्रकृतिः कर्म संभवा।
नाहं किञ्चित्करोमीतियुक्तमन्येत तत्ववित्।
नैव प्रकृति बद्धोस्ति मुक्त इत्यभिधीयते।
न चैव प्राकृतैर्दोषैर्लिप्यते तु कदाचन।
निर्णयाय्यतमसोरूपं दीपो यद्वत्प्रकाशते।
आभात्येवं वशेत्यात्मात्यक्ते वा ज्ञानजन्तमः।
स्नेहक्षायाथयथा दीपो बला निर्वाणमिच्छति। 60८ (ज)
तदात्मभावनायुक्त स्यात्मन्येवा वतिष्ठते।
घटसंवृत माकाशं नीयमाने यथा घटे।
घटो नियति नाकाशं तद्वज्जीवो नभोपमः।
भिन्ने कुंभे यथाकाशमाकाशत्वं प्रपद्यते।
विभिन्ने प्राकृते देहे तथात्मा परमात्मनि।
इत्येवमधिकारेण सर्वज्ञेनाधिकारिणा।
सर्व बन्धाद्विनिर्मुक्तस्सर्वज्ञस्सर्वगो भवेत्।
तदागमान् संपरिस्त्य हत्य सर्वान् शुद्धं गृहीत्वा
त्मसमाधियोगम्। अस्मात्परं नान्यदिहास्ति किञ्चित् ज्ञात्वैव
सन्त्यज्य मनो विकल्पम्।

विज्ञानमेवं सनुपास्य विद्वान् विज्ञात्वकार्यं सततान्वियुक्तः।
सर्वत्रनाड़ी भवतीह मुक्तस्तद्धर्मधर्मी वतिरन्तसंस्थः।

सर्वज्ञता तृप्तिरनादिबोध स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिस्तु विभुत्वमात्मा विद्धि त्वदेहस्य शिवत्वमेति।
न जपो नार्चनं स्नानं न होमो नैव साधनम्।
धर्माधर्म फलं नास्ति न विधेर्नोदक क्रिया।
निद्यमानिं न तस्यास्ति नोपवासो विधीयते।
प्रवृत्तिश्च निवृत्तिश्च ब्रह्मचर्य व्रतानि च।
अग्नि प्रवेशनं नास्ति पतनं भृगुनोदके।
विज्ञानामृतं पीत्वा विचरस्व यथा सुखम्।
६० शिवतत्त्वात्मक-क्षुद्रसृष्टिधर्म विवर्जितः।
सत्यं सत्यं पुनस्सत्यं त्रिसत्यं समयं कृतः।
अतः परतरन्नास्ति विज्ञेयं कुत्रचिद्भुवि।
विमलयति सर्वभावान् विमलात्मा विमलबुद्धिरमूढधीः।
सर्वं विमलं पश्यति विमलो विमलेन भावेन।
६१-६२. जाग्रज्जाग्रं जाग्रत्स्वप्नं तथा जाग्रत्सुषुप्तिकम्।
जाग्रतुर्यं कालमतीत परमतीतं परमदर्शनम्।
विश्वग्रासोपशान्तञ्च शिवदर्शनमेव च।
२. सायुज्यमिति भेदेन चौर्ध्वमेकादशा स्मृताः।
१. परं भूयः प्रवक्ष्यामि विमली करणोत्तमम्।
यथात्मा सर्वमेवेति स्थितव्यष्टभेद विस्तरात्।

भूतात्मात्यन्तशात्मा च तत्वात्मा जीव संज्ञिताः।
मन्त्रात्मापरमात्मश्च तस्मात्परतरन्नहि।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च।
संयोगस्सर्वभूतानां भूतात्मा संप्रकीर्तितः।
पुरुषाधिष्ठितैर्बीजैस्तन्मात्रैर्बीजसंयुतैः।
संभवन्ति महाभूतामलधातुसमान्विताः।
सर्वेन्द्रिय समायुक्तं शरीरमिति चोच्यते।
विनाहारोत्पत्तिरेवास्य तच्चाहारमयं विदुः।
आहारस्य पचीणामाद्रिसौत्वान्तिर्यविव्यति।
रसाच्छोणितं शोणितान्मांसं मांसान्मेदश्च
मेदसोस्थि अस्थिभ्यो मज्जा मज्जातश्शुक्लकम्।
शुक्लशोणित संयोगे वायुसंयोगादर्भसंभूयते।
यथाग्नीषोमीयं योनिः। तत्र शरीरमध्ये नाभिः।
नाभिस्थाने मलः मलस्थाने यदा तिष्ठन्ति। वात-
पित्तश्लेष्मण इति त्रयो मलसंक्रमात् त्रऋतुकालसंयोगात्
पुंसो रेताधिक्यात् अथ पुरुषो भवति। मातृरक्ता-
धिक्यात् स्त्री प्रजायते। उभयोस्साम्येन न पुंसकं
अथवा खञ्जकुब्जवामना जायन्ते। परस्परा कुलत्वादन्योन्य
वायुवीक्षितानां स्त्री पुंसा संयोग वैषम्याच्छुक्लं द्विविधं-

६२० भवति । तेन युग्मं प्रजायते । एकरात्रोषितं कललं
पञ्चरात्रेण बुल्बुदम् । सप्तरात्रेण मांसपेशी संभवति ।
द्विसप्तरात्रेण मांसपिण्डीकृतिर्भवति । मासादभ्यन्तरे
बाहुरंसौ जायते । मासद्वयेन हस्तपादांगुष्ठादयो
जायन्ते । त्रिभिर्मासैर्जरायुस्नायुत्वक् मांस मर्मा भवन्ति ।
चतुर्भिर्मासै र्वंक्षौ पृष्ठं उदरं कटिश्च भवन्ति । पञ्चभि-
र्मासै शिरोललाटकर्ण नासा भवन्ति । षड्भिर्मासै-
श्छिद्राणि भवन्ति । सप्तभिर्मासै शरीरस्य व्यक्तिर्भवति ।
अष्टभिर्मासैः पूर्णाकृति र्भवति । नवभिर्मासै स्समायुक्त-
चेतनो भवति । पूर्वजातिं स्मरति । द्विसोहमित्येव चिन्त-
यति । चेष्टयति । घटात् पट इवांबुनोपलभ्यते । सूक्ष्म-
त्वादाकाशेनिलो यथा तस्मात् पञ्चात्मकस्समायुक्तश्चेतन
६२८ बुद्धिरहंकारो मनः । प्रकृतिश्च प्रकृतेः पुरुषश्चमनसा
संकल्पं करोति । अहंकारेणाभिमानं करोति बुद्ध्या-
ध्यवसायुं करोति । सदाव मनसा युक्त इन्द्रियैस्सह युज्यते ।

इन्द्रियाणि तथार्थेषु नित्यमेव प्रवर्तति ।

इत्येवं प्रकृतिस्वभावं शरीरं प्रत्यये-चेष्टितव्यं भासत्वात् ।

सत्वं रजस्तमेति पुरुषस्य स्वभाव भेदं कुर्वान्ति ।

सत्वं प्रकाशकं भावं रजो रागात्मकं गुह ।

तमो मोहात्मकं भाव मुत्पादयति देहिनाम्।
सत्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।
तमसो सत्यमज्ञानं प्रमादालस्यमेव च।
सत्वात्सत्वन्दया धैर्यं विनयं स्थैर्य मेव च।
रजसः क्रोधदंभौ च निर्दयत्वं च जायते।
ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्य गुणवृत्तिस्था अधोगच्छन्ति तामसाः।
रजस्तमश्चाभिभूय सत्वं वर्धति षण्मुख।
रजस्सत्वं तमश्चैव तमस्सत्वं रजस्तथा।
यमस्वेते च पुरुषो अतिसंगात् सदा गुणम्।
सोस्याप्यधिको भूत्वा स्वधर्मे विनियोजयेत्।
एवमेक कपालस्य षोडशा पार्श्व (क)पालानि भवन्ति।
तीव्यास्ति शतानि नवस्वायुशतानि नवद्वाराणि मज्जा
पञ्चप्रस्थो मेदं प्रस्थद्वयं तिस्रोर्धं शोणकोद्यः
एकादशोत्तरं मर्मशतम्। द्रवस्य पलानि अष्टौक्षिप्त-
रस्य आढकद्वयं द्वादश पलानि पित्तनिक्ता। वृषणं
सार्धं पलपञ्चकं शुक्रस्य कुडुपत्रयं वित्तस्याढकम्
सहस्रसिरा शतानि च अनियतमूत्र पुरीष मातारस्यानियत
भावाद्विज्ञेयं एवं विधो यं ज्ञतात्मा पुरुष इति चोच्यते।

योन्तरे वर्तते शब्दस्तस्य वाचा प्रवर्तकम्।
प्राणापान समायोगात् सोत्तरात्मा प्रकीर्तितः।
तस्माच्च सर्वशास्त्राणि संस्कृत प्राकृतानि च।
देशभाषादिभिर्नित्यं विधिवत्संप्रवर्तते।
पशवश्च मृगाश्चैव पक्षिणश्च सरीसृपाः।
यावन्तः केचनस्सत्वा उच्चरान्ति सदाकृतम्।
सूक्ष्मावै पञ्चतन्मात्रा मनोहंकार एव च।
बुद्धिरष्टगुणा ज्ञेया गुणाव्यक्तञ्च पौरुषम्।
कलाकालस्तथा माया विद्याविद्येश्वरञ्च यत्।
सदाशिवं तथा तत्वं बैन्दवं शान्तमेव च।
एतेषां चैव संयोग स्तत्वात्मा पुरुषस्मृतः।
तत्तमैतैर्जगत्कृत्स्नं पाशाश्चैते मलात्मकाः।
सुसूक्ष्मास्सर्वगा नित्यास्सहजास्सर्व जन्तुषु।
प्रकृतिश्चैव बोद्धव्या प्रक्रिया च निगद्यते।
न परं प्रक्रियाज्ञानं न शिवाद्व्यापकं परम्।
न योगात्परतस्सिद्धिं न शमात्परमं सुखम्।
उदयो यस्य तत्वस्य देहे भवति षण्मुख।
तदात्मकं सदा देहि विकारमनुवर्तते।
यस्मिंश्चरति जीवात्मा तत्तत्वं प्रविसर्पते।

अभिभूय सर्वतत्वानि स च तन्मयतां व्रजेत।
मुहुर्मुहुः सदा देहि सर्वतत्वैरनुक्रमात्।
सञ्चरत्यविभक्त्या तु व्यापकत्वं च सर्वगा।
तच्च तस्य सदा स्कन्द तत्वभावैः पृथग्विधैः।
लक्ष्यते व्यापकस्यापि उदयास्तमनास्थितिः।
तदा तत्वाधिपान् भावान् प्रगृह्णाति षडानन।
सर्वधर्ममयो त्यात्मा यथा कामं प्रकल्पयेत्।
यस्मिंस्थितो निर्वृतिं याति तमेव परिसेवते।
तस्मिंस्तत्वे स्थितिं विद्यात्ततः कर्म समाचरेत।
तस्मादेव विदित्वा तु शिवतत्वे निरामये।
निर्विकारे निराधारे रतिं कुर्याद्विचक्षणः।
न पुनर्मोहमायाति तस्मिंश्चैव षडानन।
स्थित्वाऽस्मिन्ननन्त काले पि परं निर्वाणमाप्नुयात्।
देही सर्वगतस्सूक्ष्मः पुराणश्शाश्वतो ध्रुवः।
व्यापकस्सर्वतत्वानामजोव्यक्तस्सनातनः।
अस्वतन्त्रो निबद्धश्च चिन्मात्रो मलदूषितः।
समूढो नित्यसंसारी किञ्चिज्ञोनीश्वरो क्रियः।
परशुधर्मांश्च संहृत्य शिवधर्मस्ततोन्यथा।
परशुधर्मोदयः पुंसोत्यनेकाकारसंभृतः।

६२ आत्माजन्तुपुमान्देही पुरुषः पुद्गली तथा।
जीवं कपाली क्षेत्रज्ञः पर्याया ऽवमादयः।
सर्वे धर्मात्मनस्सन्ति संयुक्तस्सर्व कर्मभिः।
सर्वान्देहानवाप्नोति याति सर्वासु योनिषु।
यावन्तोत्पद्यते ज्ञानं तावद्भ्रमति कर्मणा।
अज्ञानावृत देहस्तु दुःख शोक परिप्लुतम्।
ज्ञानं लब्ध्वा परंशान्तमचिरेणाधिगच्छति।
तदा तु सर्वदुःखानां हानिरस्योपजायते।

१२। ॥ श्रुतात्मादि प्रकरणं समाप्तम् ॥ ३१

— ० —

अतः परं प्रवक्ष्यामि पुरुषं मन्त्रविग्रहम्।
सर्वशोकहरन्दीप्तं सर्वपापहरं परम्।
मननं सर्ववेदित्वं त्राणं संसार्यनुग्रहम्।
मननं त्राणधर्मित्वान्मन्त्र इत्यभिधीयते।
स देवासुर यक्षाणां किन्नराप्सरऽरक्षसाम्।
पितृमातृगणानाञ्च सिद्धविद्याधरादिषु।
नागगन्धर्व तिर्यक्ष पिशाचञ्च मानवान्।
शिवादौ सर्वतत्वानां मन्त्राविद्यन्ति शाश्वताः।
नास्ति मन्त्रैर्विना किञ्चित् सर्वं स्थावरजंगमम्।

यावन्तः केचनस्सत्वा मन्त्राधिष्ठित विग्रहाः।
यस्य यस्य हितत्वस्य आदिमन्तु यदक्षरम्।
षष्ठं त्रयोदशान्तच्च तस्मिन्तस्मिन्नियोजयेत्।
तन्तु मन्त्रं विजानीयात् सर्वतत्वात्मकं स्विदुः परम्।
बिन्दुनालंकृतं मूर्ध्नि सर्वकाम फलप्रदम्।
तेषामंगानियुञ्जीत न ब्रह्मास्तेषु कीर्तिताः।
दीर्घाभिन्नास्मृतास्त्यंगा नेत्रोनुस्वार संयुतः।
सविसर्जस्मृतोत्यस्त्र स्सोनुस्वार विवर्जितः।
इतरेषान्तु बीजानां मूर्धिबिन्दुं प्रदापयेत्।
ओंकार दीपिता मन्त्रा नमस्कारान्त योजिताः।
अर्चने संप्रयोक्तव्या होमे स्वाहान्त योजिताः।
आवाहनार्घ्य पात्रेषु स्थापनाचमनेषु च।
स्नपने मन्त्रविन्यासे ध्या धारणा ध्यानकर्मसु।
प्रजाबलिविधानेषु जपहोम क्रियासु च।
शिवस्य योविधिः प्रोक्तस्सर्वकर्मक्रमेषु च।
सर्वेषामेव तत्वानां तं विधिं परिकल्पयेत्।
अनुक्तं यद्भवेत्किञ्चित् तत्सर्वं हृदयेन तु।
इवं विधिं विधानज्ञो बुध्यार्कर्म समारभेत्।
वश्यीकरणं प्रोक्तं सर्वतत्वेषु मन्त्रवित्।

66a

यो यस्यैव भवेन्मन्त्रो वाचुवचकभेदकृतः।
स्थूलसूक्ष्मः परस्सोहि मन्त्रात्मा पुरुषस्मृतः।
स्थूलसूक्ष्मं परं ज्ञात्वा कर्मकुर्याद्यथोसितम्।
स्थूलशब्दमितिज्ञेयं सूक्ष्मं चिन्तामयं भवेत्।
चिन्तया रहितं यन्तु तत्परं परिकीर्तितम्।
स्थूलस्तुवाचिकं सिद्धिं -- त्मा योगश्च यच्छति।
परः परमनिर्वाणं वं प्राप्य ननिवर्तयेत्।
यथा प्रदीपः प्रतिबुध्यमानो
भवत्यनेकः पुनरेक एव।
तथाहि मन्त्रः परिकल्प्यमानो
भवत्यनेकः पुनरेक एव॥
यथांशसोनेन विधस्य लोके
जात्यन्तरं त्येकमनेक रूपम्।
तथैव मन्त्रस्य च वेदितव्यं
जात्यन्तरं त्येकमनेकरूपम्।
यमेव साधयेन्मन्त्रस्मात्मानं प्रकल्पयेत्।
तदात्मकास्मृता त्यंगा बहिरन्तर्विभागशः।
यस्य यादृग्विधंरूपं व्रतं तस्यैव तादृशम्।
तादृशोत्युपचारस्तु मन्त्रादेवानुसपतः।

शास्त्रोपदृष्टमार्गेण यथारूपं प्रकल्पयेत्।
तथा रूपो भवेन्मन्त्रस्ततः कर्म प्रसाधयेत्।
श्वेतभ्रविविशेषान्तु वर्णरूपं पृथग्विधम्।
67a सर्वोपाश्रयसंपन्न स्फटिकोपलवद्यथा।
इति मन्त्रात्मकः पुरुषः प्रोक्तः सर्वार्थसाधकः।
सर्वज्ञस्सर्वगश्चैव सर्वरूपमयो हि सः।
परात्परतरं वक्ष्ये मन्त्रातीतं निरञ्जनम्।
निरामयं निराधारं वर्णरूपविवर्जितम्।
सर्वज्ञस्सर्वगश्शान्तस्सर्वात्मा सर्वतोमुखः।
अतीन्द्रियो निरालम्ब सस्सूक्ष्मश्शाश्वतोव्ययः।
सुनिष्कलो निरालंबो ज्ञेयो व्यासको ध्रुवः।
निरौपम्यो प्रमेयश्च प्रमेयश्च परमात्मा प्रकीर्तितः।
यादृशेन तु भावेन पुरुषोपास्यते यदा।
तथैकधा बहुधा चैव तथैव प्रतिपद्यते।
यमेव चिन्तयेद्रूपं सर्वमात्मनिवियते।
सर्वकामप्रदोत्यात्मा प्रोक्तश्चैव हि भेदविस्तरः।
67b भूतात्माद्यन्तरात्मा च तत्वात्मा जीवसंज्ञकः।
मन्त्रात्मा परमात्मश्च एकोपि बहुधा स्थितः।
भूतात्मा भूतसंयोगात् तत्वात्मा तत्वसंस्थितः।

मन्त्रात्मा मन्त्रमयो ज्ञेयो त्यन्तरात्मा शिवान्वितः।
भोक्ता तु सुखदुःखानां प्रकृस्थो गुणान्वितः।
जीवस्तु जीवनं तेषा मेभिर्मुक्तः परस्तु सः।
सर्वरूपं यदैश्वर्यं नित्ययुक्तो त्यवाप्नुयात्।
प्राप्तोपि स द्विधाभावि पुनर्भव मवाप्नुयात्।
प्रारब्धेन परीक्षीण क्षयात्पापस्य कर्मणः।
तत्व विश्लेष काले च अद्वैत प्रतिपाद्यते।
एक एव परो त्यात्मा चित्तभेदात्वनेकधा।
एकस्यैव हि नामानि पृथग्भूतान्ययोगिभिः।
अनामकस्य गीयन्ते भ्रान्ति ज्ञान मोहितैः।
६४० यदाभिव्यज्यते ज्ञानं विमलं सर्वतो मुखम्।
तदात्मयं वरं धर्म विन्दते शाश्वतं ध्रुवम्।
अहमेव परो त्यात्मा पुरुषः कारणस्मृतः।
अहमेव परंब्रह्म अहं ज्ञेयमनक्षरम्।
सर्वे विषयकाभावान्मत्त एव पृथग्विधाः।
भावाभावविनिर्मुक्त अहमेव शिवोव्ययः।
योगसन्यस्तकर्माधौ ज्ञानसञ्छिन्नसंशयम्।
निर्विकल्पस्तदा नित्य मात्मानं पर्युपासयेत्।
निरस्य वासनास्सर्वा आत्मतृप्तो निरामयः।

अद्वैतभावनायुक्तस्सदात्मानमुपासयेत्।
अप्राकृतेन नित्येन निर्मलेनामलिकारिणा।
व्यापकेनातिसूक्ष्मेण परेण योगचक्षुषा।
विशुद्धं शाश्वतं नित्यं अप्रमेयमनूपमम्।
निर्विकल्पमचिन्त्यञ्च हेतु दृष्टान्तवर्जितम्।
सुतृप्तं निर्गुणं शान्तं तत्वातीतं निरञ्जनम्।
अविभाव्यमसन्देहं पश्यन्नीशानमात्मनि।
सर्वस्थं सर्वदेहस्थं व्यापकं सर्वतो मुखम्।
निरामयं निराधारमात्मानं पश्यते शिवम्।
विभिन्नं क्रियामार्गं मन्त्रतन्त्रपरापरम्।
मूर्तामूर्तं जगत्कृत्स्नं पश्यत्यात्मन्युपस्थितम्।
सर्वज्ञस्सर्वदर्शी च परिपूर्णस्वनिर्मलः।
विमुक्तः केवलीभूतस्सुखमक्षयमाप्नुयात्।

म।12 – 167 – 202. हरिः ओं स्वर्णवल्ल्यंबिकासमेत श्रीकालीश्वरस्वामिसहायम् सर्वज्ञानोत्तरं समाप्तम्।

॥ शिवाय परमगुरवे नमः॥

॥ शुभमस्तु ॥

॥ ओं ॥

———•———